International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 13-14
© 2025 IJMH
www.themultijournal.com
Received: 01-07-2025
Accepted: 09-07-2025
Publish : 11-07-2025

**वैजयन्तिमाला रथ**
शोधच्छात्रा, पुराणेतिहासविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**वैजयन्तिमाला रथ**
शोधच्छात्रा, पुराणेतिहासविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# पद्मपुराणे रुद्राक्षमाहात्म्यम्

**वैजयन्तिमाला रथ**

**पद्मपुराणस्य कोऽर्थः -**

अष्टादशपुराणमध्ये पद्मपुराणमन्यतमम् ।

**पाद्म तु पञ्चपञ्चाशत् सहस्राणीह कथ्यते ।**[1]

महर्षिवेदव्यासद्वारा रचितं पद्मपुराणं वैष्णवपुराणम् इत्युच्यते। अत्र भगवतः विष्णोः विस्तृतमहिमा, भगवतः श्रीरामस्य तथा श्रीकृष्णस्य चरित्रम्, तीर्थाणां माहात्म्यम्, शालग्रामस्य स्वरूपम्, तुलसीमहिमा विभिन्नव्रतानां विषये च सुन्दरं वर्णनं दरीदृश्यते । भगवतः नाभिकमलात् विस्तारितमित्यतः इदं पुराणं पद्मपुराणं कथ्यते ।

**तच्च पद्म पुराभूतं पष्थवीरूपमुत्तमम्।**
**यत्पद्म सा रसादेवी पष्थवी पश्चिक्ष्यते ॥**
**ब्रह्म तत्रारदायाऽह नारादोऽस्मगुरोः पुरा।**
**व्यासः सर्वपुराणनि सेतिहासानि संहिता ॥**[2]

**पद्मपुराणे वर्णितविषयाः -**

गणेशस्य कार्त्तिकेयस्य जन्म, तारकासुरवधः, नृसिंहावतारवर्णनम्, हिरण्यकशिपु-वधवर्णनम्, भगवता शिवेन आदित्यस्तुतिः, गायत्री माहात्म्यवर्णनम्, अधमब्राह्मणवर्णनम्, पतितविप्रकथा, गरूडचरित्रवर्णनम्, ब्राह्मणानां कर्म महत्त्वं च, गोमहत्त्वं गोदानफलम्, पितृभक्तिः पातिव्रत्यम्, ब्राह्मणनरोत्तमस्य कथा, परिव्रतामाहत्म्यम्, माण्डव्यमुनिकथा, तुलाभारवैश्यचरितवर्णनम्, सत्यभाषणप्रशंसा, कामदुर्जयत्ववर्णनम्, अहल्याचरितम् इन्द्र-

चरितम्, परमहंसचरितम्, लौहित्यस्य उत्पतिः, जलाशयमाहात्म्यम्, वृक्षरोपणे फलप्राप्तिः, अश्वपूजा, देवालयनिर्माणफलम्, सेतुवन्धनफलम्, रुद्राक्षधारणविधिः रूद्राक्षस्य माहात्म्यं वर्णितम्। आमलकीफलमहिमा, प्रेतकथा, तुलसीदलस्य माहात्म्यम्, तुलसीस्तोत्रस्य वर्णनम्, गङ्गामाहात्म्यम्, गणेशस्य महिमा तथा स्तुतिः, पूजाफलम्, सञ्जयव्याससंवादः, मनुष्ययोन्याम् उत्पन्नानां दैत्यदेवतानां लक्षणानि।

सूर्यस्य माहात्म्यवर्णनम्, अर्कसप्तमीव्रतविधानवर्णनम्, भगवतः सूर्यस्य उपासनायाः फलं, भद्रेश्वरराज्ञः कथा, भौमपूजावर्णनम्, पुराणावतारवर्णनम्, ग्रहपूजावर्णनम् इत्यादिविषयाः अस्मिन् खण्डे दरीदृश्यन्ते।

**रुद्राक्षमहिमा -**

**रुद्राक्षे प्रजपन्मंत्रं पुण्यं कोटिगुणं भवेत् ।**
**दशकोटिगुणं पुण्यं धारणाल्लभते नरः ॥**

नयनादुत्पन्ना रुद्राक्षा इति लोके ख्याताः अतः श्रेष्ठतरा इति तन्मालामहिमा च ऋग्वेदादिचतुर्व्वपि वेदेषु श्रीमहामुनिव्यासनिर्मितभारत-पुराणादिग्रन्थसंदर्भेषु सविस्तरा प्रसिद्धतरा चास्ति तथापि आधुनिकान् कार्या-सक्तानपि साभिलाषानवलोक्य धर्मलोपभयात् परोपकार-हेतवे तेषामभिलाषा पूत्तिनिमित्तं सद्धर्मप्रकाशकं महल्लघ्वेत-त्संग्रहमत्यल्पमतिना श्रीमता जान्हवीतीरनिवासिना

प्रेम-पुरीतिपरिव्राजकेन मया वेदादिग्रन्थेभ्यः सारमादाय संगृहीतं चेदं रुद्राक्षमाहात्म्यम् ॥

**रुद्राक्षस्य फलम् -**

रुद्राक्षदर्शनेन पापपाशिनाशः, स्पर्शेन स्वर्गप्राप्तिः, धारणेन च मोक्षप्राप्तिर्भवति । मस्तके हृदये भुजायां रुद्राक्षधारणं क्रियते शङ्करसदृशो भवति। रुद्राक्षधारी ब्राह्मणो यत्र कुत्रापि स्थित्वा रुद्राक्षमालां नीत्वा जपं करोति चेत्तस्य पापक्षयो भवति ।

यः साधकः शून्यागारे शवस्याग्रे श्मशाने चतुष्पथे च दीवि मन्त्रं जपेत् सः साधकः सद्यः सिद्धिं प्राप्नोति । वैदिकमन्त्रेण, पौराणिकमन्त्रेण, आगमेन च यत्सिद्ध्यति तत्सर्वं रुद्राक्षमालाजपनेन सम्भवति। तथा च पद्मपुराणे विविधरुद्राक्षस्य वर्णनं लभ्यते । यथा -

**एकवक्रः (एकमुखी रुद्राक्षः)-**

स्वयं शिवस्वरूपः ब्रह्महत्यां व्यपोहति तस्माद्धारयेत्सर्वपापक्षयाय च। अस्य धारणेन शिवलोकं संगच्छेत् शिवेन सह च मोदते।

**द्विवक्रः रुद्राक्षः -**

द्विवक्रः रुद्राक्षधारणेन नरस्य गोवधादिकं सर्वपापक्षयं याति नरश्च स्वर्ग प्राप्नोति ।

**त्रिवक्रः रुद्राक्षः -**

त्रिवक्ररुद्राक्षधारणेन नरस्य जन्मार्जितं पापं दहति। स्त्रीहत्याब्रह्महत्याभ्यां यत्पापं लभते तत्सर्वं नश्यति तत्क्षणात्। उदररोगो न भवेत्। ज्ञानवान् भवति पराजयस्तस्य न जायते। अग्निना गृहं न दह्यते। वज्रात् निवारणं नाशुभं विद्यते तस्य कदाचित्।

**चतुर्वक्रः रुद्राक्षः -**

चतुर्वक्त्ररुद्राक्षधारणेन द्विजो वेदविदावरो सर्वशास्त्रज्ञो भवेत् । चतुर्वक्ररुद्राक्षधारणेन द्विजो वेदविदावरो सर्वशास्त्रज्ञो सर्वधर्मार्थतत्त्वज्ञस्स्मार्तः पौराणिको भवेत्। नरहत्यायां यत् पापं जायते बहुसत्वेषु वेश्मसु तत्सर्वं शीघ्रं दह्यते।

**पञ्चवक्रः रुद्राक्षः -**

पञ्चवक्रः वामददेवः आश्रितः। रुद्रस्य आत्मजं रूपम्। अस्य धारणेन सुरासुरैः शिवस्याग्रे पूजनीयः सार्वभौमो, सर्वतेजाः भवेत्।

**षड्गुक्रः रुद्राक्षः -**

षङ्गक्ररुद्राक्षः कार्तिकेयस्य स्वरूपम्। दक्षिणहस्ते अस्य धारणेन मनुष्यो ब्रह्महत्यादिभिः पापैर्मुच्यते। कदापि पराजयं न प्राप्नोति। भुवि च गुणानामकरो भवति। कुमारत्वमवाप्नोति यथा ब्राह्मणो गौरीशनन्दनः क्षत्रियो भूषपूज्यश्च जयमलभत। वैश्याः शूद्रादयः जनाः सदैश्वर्यप्रपूरिताः ।

**सप्तवक्रः रुद्राक्षः -**

सप्तवक्ररुद्राक्षधारणेन विषं न क्रमते तनौ। सर्वपापानि यथा ब्रह्महत्या सुरापानम्, चौर्यम्, गुरुतल्पजं नश्यति। देवस्य सदृशं भोग्यं त्रैलोक्ये निश्चितं लभेत ।

**अष्टावक्रः रुद्राक्षः -**

अष्टावक्ररुद्राक्षधारणेन न मूर्खः स्यात्, न आतुरः न च नष्टधीः अविघ्नं सर्वकार्येषु तस्यैव सततं भवेत् ।

**नवास्यरुद्राक्षः -**

नवास्यरुद्राक्षधारणेन कपिलं मुक्तिं धृत्वा तुल्यवलो भवेत् लक्षकोटिसहस्राणि ब्रह्महत्यां करोति तस्यापि सर्वं पापं नश्यति शीघ्रम्। सुरसके सदा देवैः सह पूजितो भवति मघवावत्।

**दशवक्ररुद्राक्षः -**

दशवक्रस्य धारणेन पत्रगाश्च विनश्यन्ति।

**एकादशरुद्राक्षः -**

एकादशरुद्राक्षधारणेन सहस्राश्वेमेधयज्ञस्य फलं प्राप्नोति। एकादशमुखी-रुद्राक्षधारणेन हरस्य सदृशं लोके पुनर्जन्म न विद्यते।

**द्वादशीमुखी रुद्राक्षः -**

द्वादशमुखीकण्ठदेशे धारयति चेत् आदित्यः तुष्यते। गोमेधं नरमेधं च कृत्वा यत्फलश्रुते तत्फलं शीघ्रमाप्नोति । वज्रादेश्च निवारणं नैव वह्नेर्भयं चैव न व्याधिः वर्तते । अर्थलाभः सुखं च जायते।

**त्रयोदशीमुखी रुद्राक्षः -**

त्रयोदशमुखी-रुद्राक्षधारणेन सर्वकामफलप्रदः सुधारसायनं धातुवादस्य पादुकाः सिद्ध्यन्ति ।

**चतुर्दशमुखी रुद्राक्षः -**

चतुर्दशमुखीरुद्राक्षधारणेन पूज्यते सततं देवैः पुण्यगौरवं च प्राप्येत।

**उपसंहारः –**

रुद्राक्षं शिवस्य रूपं मन्यते, तस्य धारणेन अनेके लाभाः सन्ति। रुद्राक्षधारणेन मनः शान्तं भवति, नकारात्मकशक्तिः दूरं भवति, व्यक्तिः सुखं, शान्तिं, समृद्धिं च ददाति । रुद्राक्षस्पर्शन मानवः स्वर्गसुखं प्राप्नोति स्मरणेन च मोक्ष प्राप्नोति। ब्रह्मग्रन्थि-युक्तमङ्गलमयरुद्राक्षमालां नीत्वा यः जपदानपूजनादिकर्म करोति तस्य अक्षयं पापमपि प्रणश्यति। मस्तके हृदये च रुद्राक्षमालां धृत्वा यः चलति सः अश्वमेधसदृशं फलं प्राप्नोति । रुद्राक्षः अतीव पवित्रः प्रबलः विषयः अस्ति। तस्य धारणेन मनुष्यस्य अनेकाः लाभाः प्राप्यन्ते, तस्य जीवनं सुखदं भवति ।

**सन्दर्भग्रन्थसूची –**

1. पद्मपुराणम्, गीताप्रेस, गोरखपुर
2. पद्मपुराणम्, चौखम्बापब्लिकेसनस्, दिल्ली
3. पद्मपुराणम्, नागपब्लिकेसनस्, दिल्ली
4. पद्मपुराणम्, चौखम्बासुरभारती, वाराणासी

**सन्दर्भ**

1. प.पु

2. प.स्व.ख.पृ.सं. 1400, श्लो. 28